
अमर चित्र कथा

संख्याः 22 6 रु.

भगवान् बुद्धः




अन्यधर्मवत् हिन्दुधर्मेण अपि अनेक-स्वतन्त्र-विचार-धाराभ्यः जन्म दत्तम्। एतेषु एकतमाः प्रखराः विचारवन्तः आसन् राजकुमाराः सिद्धार्थाः ये अग्रे जीवने भगवान् बुद्धः इति नाम्ना प्रसिद्धाः जाताः। सिद्धार्थ-समये हिन्दुधर्मेण स्वस्य शक्तिः, सात्त्विक-पवित्रता च परित्यक्ते आस्ताम्। धर्मस्य नाम्ना वर्णव्यवस्था अतिरेकतां प्राप्तवती। पण्डितैः च सा दमनस्य साधनत्वेन अङ्गीकृता आसीत्। गौतमबुद्धैः पण्डितानाम् एषा सत्ता तथा च भगवतः प्रतिनिधिः इति एतेषाम् अधिकारः धिक्कृतः। तथैव च वेदानां सत्ताविषये अपि शङ्का उपस्थापिता। उपासना, तपस्या च केवलं कर्मकाण्डत्वेन अवशिष्टे इत्येतेषां मान्यता आसीत्। एतदर्थं यद् मननं, चिन्तनं च अत्यावश्यकं, तथापि तद् विलुप्तमेव आसीत्।

अतः ते यथार्थसत्यस्य अन्वेषणे निमग्नाः। बोधिवृक्षस्य अधः एतैः तपस्या समारब्धा। एषा तपस्या सफला सञ्जाता। तथा बुद्धत्वस्य प्राप्तिः अभवत्। एवंविध यद् ज्ञानं एतैः अधिगतं तद् ज्ञानं मानवजातिभ्यः समर्पितम्। यतः एतेषां मनःसु सर्वमानवजाति-विषये करुणायाः अपारसागरः समुल्लसति स्म। जनानां धर्मपरिवर्तनविषये तिलमात्रः अपि एतेषां विचारः नासीत्।

अद्य अपि एतेषाम् अनुयायिनः संपूर्णे जगति समुपलभ्यन्ते। प्रायः एते अधिकांशेन सुदूरपर्यन्तं पूर्ववर्तिषु देशेषु निवसन्ति इति दृश्यते।

Published by H.G. Mirchandani, for India Book House Pvt. Ltd., Mahalaxmi Chambers, 22, Bhulabhai Desai Road, Bombay-400 026, and printed by him at Prasad Offset Press Shed B & C, S. No. 42 Hissa No. 2, Sativali, Vasai Kaman Road, Vasai Taluka, Thane District



***Editor:* Anant Pai**






एकरात्रौ तेषां राज्ञी मायादेवी स्वप्ने अपश्यत् यत् षड्दन्तवान् शुभ्रः हस्ती तस्याः गर्भाशयं अच्छिनत्।
दशमासानन्तरं राज्ञी स्वमातृगृहं प्रति प्रस्थानं कृतवती। लुम्बिनीमार्गे एकः अतिसुन्दरः कुञ्जः आगतः। तदा
तिष्ठत। अहमत्र कतिपयकाले स्थातुकामा।
राज्ञी अवतीर्य एकशालवृक्षं प्रत्यगच्छत्, यः कुञ्जमध्ये स्थितः आसीत्। अकस्मात् –
अहं पीडिता जाता अत्र विश्रामं गृह्णामि।
तत्रैव तया पुत्रः प्रसूतः। वैशाखपूर्णिमायाः चन्द्रप्रकाशयुक्ता सा रात्रिः। सर्वतः शान्तिः संपन्ना आसीत्।


राजा समाचारं श्रुत्वा सत्वरं लुम्बिनीं गतः राज्ञीं च शिशुं च स्वभवनम् आनीतवान्। तदा एकमुनिराजः बालकदर्शनार्थम् आगतः।
मुनिराजाः भवतां नेत्रयोः अश्रूणि? भवन्तः दुःखिताः?
अयं बालकः चक्रवर्ति सम्राट् वा संन्यासी वा भवेत्। मम दुःखं इदम् अस्ति यत् अस्य वचनश्रवणार्थम् अहं जीवितः न तिष्ठामि।
राजा, राज्ञी च अतिप्रसन्नतायाम् आस्ताम्। पञ्चमे दिने –
बालकस्य नाम सिद्धार्थः भवतु।
अस्माभिः एतादृशी व्यवस्था कार्या यत् एषः चक्रवर्ति सम्राट् भवेत्, न संन्यासी।
तदनन्तरमेव राज्ञी गभीरतया रुग्णा अभवत्।
सिद्धार्थजन्मनः सप्तमे दिने –
भगिनि प्रजापते, अहमेनं संसारं त्यक्त्वा निर्गमिष्यामि। ततः सिद्धार्थाय मातुः ममता दीयते भवत्येति वचनं देयम्।
वचनं दीयते।


वर्षमेकं व्यतीतम्-
प्रजापते, त्वया सिद्धार्थविषये- मातृवदेव ध्यानं दीयते।
सिद्धार्थविषये मे मनसि अति- ममता। तस्य माता इति मे गर्वः अपि।
सिद्धार्थः यथा यथा वर्धमानाः तथा राजा मुनिराजस्य भविष्यं स्मृत्वा चिन्तितः अभवत्।
सः एकलः जम्बुवृक्षाधः उपविश्य एतावन्तं सुदीर्घ- समयं व्यतीतं करोति। एतद् लक्षणं न योग्याम्।
ते वदन्ति- तस्य सहचराः अति- निर्दयतया खेलं खेलन्ति।
एकदिने सिद्धार्थीःएकल एव उद्याने सञ्चरन्ति स्म-
दीना सा चटका कस्य बाणेन सा मर्माभिहता कृता!

सिद्धार्थैः सावधानेन शनैः बाणः अपकृष्टः। व्रणोपरि उपचाराः कृताः केनचित्कालेन-
एषा चटका मम अस्ति। मया बाणेन विद्धा एषा मह्यं देहि।
सः सिद्धार्थनां पितृव्यपुत्रः देवदत्तः।
देवदत्त, एषा अति- सुन्दरा चटका अस्ति। त्वं किम- र्थम् एना पीडयसि।
चटका मम अस्ति मह्यं देहि।
मया नैव दीयते।
प्रकरणं राजसभायां प्रविष्टम्
राजकुमार, चटकां स्वाधीने स्थाप- नस्य अधिकारः कः?
श्रीमन्, यदि मया बाणः नापकृष्टः तदा चटका मृता अभविष्यत्। तस्यै मया जीवनदानं दत्तम्। भवद्भिः वक्तव्यम्- चटको- परि कस्य अधि- कारः भवेत्?- जीवनदातुः वा जीवनहरस्य वा भवेत्?



एतेषां कथनम् उचितम्। येन प्राणाः संरक्षिताः तस्य एव अधिकारः अधिकः भवति।
धन्यवादाः न्यायाधीश महोदयाः।
कतिपयानि वर्षाणि गतानि। एकः कुलीनः शाक्यवंशी दण्डपाणिः स्वकन्या-यशोधरायाः स्वयंवरं रचितवान्। सुदूरतः राजकुमाराः तत्र समुपस्थिताः।
यशोधरा सिद्धार्थम् अवृणोत्।



एतस्मिन् विषये उपस्थिताः राजकुमाराः क्रोधाविष्टाः सञ्जाताः दण्डपाणेः समीपं च गताः
राजकुमारी - विवाहः सिद्धार्थेन सह भवितुं नार्हति सः शूरः वीरः च नास्ति।
भवद्भिः धनुर्विद्या-परीक्षा ग्राह्या। तस्यां यः विजयी भवेत् तेन सह राजकुमार्याः विवाहः कार्यः।
दण्डपाणिः स्वकन्यायाः अनुनये प्रायतत।
यशोधरे, त्वं कमपि अन्यं वृणु।
पितः मया तु वरणं कृतम्। केवलं तव आज्ञाम् इच्छामि।
एनं समाचारं श्रुत्वा राजा शुद्धोधनः उद्विग्नः अभवत्।
किमर्थं भवान् उद्विग्नः जातः पितः?
जनाः त्वां शूरं वीरं वा नहि मन्यन्ते।
पितः, दण्डपाणिना परीक्षा करयितव्या मया भागः गृह्यते।
एतत् श्रुत्वा प्रसन्नः अस्मि। सिद्धार्थ, तव पूर्वजाः शूरवीराः आसन्।


परीक्षादर्शनार्थं बहवः जनाः समुपस्थिताः।
अश्वारोहणे सिद्धार्थः सर्व-प्रथमः आगतः।
धनुर्विद्यायामपि कः अपि तैः तुल्यः न अभवत्।
महता वैभवोत्साहेन यशोधरा-सिद्धार्थयोः विवाहः संपन्नः।
राज्ञा सिद्धार्थस्य कृते सर्वसुखसुविधानां व्यवस्था स्थापिता।



यथासमये यशोधरया एकः पुत्रः प्रसूतः। राजा शुद्धोधनः एतस्मिन् विषये अतिप्रसन्नः अभवत्।
महाराज, भवतां पौत्र-लाभः जातः।
परमात्मने धन्यवादाः अधुना सिद्धार्थ-मनसि संन्यासार्थं विचारः न संभविष्यसि।
एकदिने-
पितः, प्रासादात् निर्गत्य अहं जगत् द्रष्टुम् इच्छामि।
भवतः कृते रथः सिद्धः स्थाप्यते मया। तेनैव भवान् गच्छतु।
कतिपयदिनानन्तरं चतुरश्वाणां सुन्दरे रथे उपविश्य सिद्धार्थाः नगरे प्रस्थिताः। छन्नः तेषां सारथी आसीत्।
राजकुमारः कियान् सुन्दरः अस्ति।
महान् शूरः वीरः च। निर्भयः अपि।


राज्ञा प्रथममेव आदेशः दत्तः आसीत् यत् नगरे किमपि शोकजनक दृश्यं राजकुमारस्य पुरतः न भवेत् । परन्तु सिद्धार्थः यदा अग्रे गतः ।
छन्नकः अयम् ? अतिदुर्बलः दृश्यते अस्य च केशाः शुभ्राः शरीरस्य च जर्जरता वर्तते ।
स्वामिन् , एषः वृद्धः जातः । वृद्धावस्था-प्रभावः अस्ति ।
अपि सर्वे वृद्धाः भविष्यन्ति, छन्न ?
हं स्वामिन् वृद्धावस्था सर्वेषां भवति
किं यशोधरा अपि वृद्धा भविष्यति ? समयानुसारं मम शक्तिः अपि क्षीणा जायते च ?
ततः एकदिने-
अस्य पुरुषस्य का अवस्था अस्ति ?
एषः रुग्ण अस्ति स्वामिन् - पीडया क्रन्दति एषः ।
किम् अयमेव एकलः रुग्णः अस्ति ?
नहि, स्वामिन् रुग्णाः तु सर्वे जनाः भवन्ति ।


अहमपि ?
हं स्वामिनः भवन्तः अपि ।
ततः एकदिने च-
एनं पुरुषं स्कन्धे आरोप्य किं नयन्ति छन्न ?
अयं मृत्युं गतः अस्ति ।
मृत्युः केवलम् अस्य एव, सर्वेषां भवति वा ?
यस्य जन्म भवति, एकदिने तस्य मृत्युः भवति एव ।
छन्न, मम प्रकृतिः अस्वस्था । प्रासाद प्रति चलतु ।
प्रत्यागमनमार्गे-
छन्न, रथं स्थापय । एषः कः ? महान् शान्तः भाति- यावन्तः मनुष्याः मया दृष्टाः तेषु अयं भिन्नः भाति ।
अयं संन्यासी अस्ति । सत्यान्वेषणे अनेन जीवनसुखानि त्यक्त्वा अङ्गीकृतानि कष्टानि ।



राजप्रासादे –
सिद्दार्थ, भवान् उद्विग्नः किमर्थम् ? कारणं किम् आस्ति ?
मातः मया ज्ञातं यत् सर्वाणि जीवितानि च सुन्दराणि च वस्तूनि यथापूर्वं नहि तिष्ठन्ति। जनाः वृद्धाः भवन्ति, रुग्णातां गच्छन्ति म्रियन्ते च। एतत् सर्वं पुनः पुनः सञ्चिन्त्य महान् शोकः भवति।
एक रात्रौ तेन निर्णयः गृहीतः –
मया दुःखपीडा-समाप्त्यर्थम् उपायः अन्विष्यते। यथा सः संन्यासी तथा अहमपि सत्यम् अन्विष्यामि।
छन्न, सिद्धं स्थापय अश्वम्। अहम् विहारार्थं गच्छामि।
यथाज्ञा स्वामिन्।
गमनात्पूर्वं सिद्दार्थाः शयनमन्दिरं गताः यत्र तेषां पत्नी यशोधरा राहुलेन सह गभीरनिद्रां गता आसीत्।
निर्गमनकाले राहुलस्य प्रियमपि कर्तुं न शक्नोमि। तदा यशोधरा जागृता भवेत्। मया अधुना निर्गन्तव्यम्।


सिद्दार्थाः अश्वम् आरुह्य निरगच्छन्। छन्नः तैः सह आसीत्।
नगरात् बहिः निर्गत्य सिद्दार्थाः अश्वात् अवातरन्।
छन्न मम सर्वाभूषणानि गृहाण। कपिलवस्तुं गच्छ।
ततः सः स्वकेशकर्तनं कृतवान्। एकलः पद्भ्यां प्राचलत्।
अग्रे एकः भिक्षुकः तेन दृष्टः।
बन्धो, शृणु, मम वस्त्राणि त्वं गृहाण स्वस्य च वस्त्राणि मह्यं देहि...
ससन्तोषेण।
सिद्दार्थाः प्रचलन्तः राजगृहमिति मगधराजधानीं प्राप्तवन्तः। मौनं धृत्वा एव सः प्रतिगृहं गत्वा भिक्षाग्रहणं करोति। राजा बिंबिसारः स्वप्रासादात् तमपश्यत्।
पश्यत एनं साधुम्-कियान् सुन्दरः अस्ति। ज्ञातव्यः कः एषः ? इति


दूताः यदा सिद्धार्थविषये पृच्छां कृत्वा प्रत्यागताः, तदा बिंबिसारः तस्य दर्शनार्थं गतः।
भवन्तः उच्चवंशीयाः ज्ञायन्ते। भवतां हस्ते भिक्षापात्रं नहि, शासनव्यवस्था भवितुमर्हति। मया मम राज्ये भवद्भ्यः उच्चपदं प्रदीयते चलन्तु भवन्तः।
राजानः, भवन्तः महादयालवः, परन्तु भवतां प्रस्तावः मया न स्वीक्रियते। मया ज्ञायते यत् जीवने दुःखमेव दुःखं व्याप्तम्। मया दुःखान्तस्य उपायः अन्वेषणीयः।
भवताम् अयम् उद्देश्यः अस्ति तथा भवतां सफलतायाः कामना क्रियते मया। यदा भवद्भिः उपायः प्राप्यते तदा मह्यं कथनस्य कृपा करणीया।
सिद्धार्थाः राजगृहतः मुनिऋषीणाम् अन्वेषणार्थं निर्गताः। परन्तु तेषामुपदेशेन तेन शान्तिः न प्राप्ता। ततः ते उरुबिल्वघनारण्यं गताः यद् वर्तमान गयायाः समीपे आसीत्।



उरुबिल्वारण्ये पञ्चसाधवः निवसन्ति स्म।
एषा व्यक्तिः ध्येयदृढा भाति- सफलतां गत्वा एव स्थास्यति। अस्माभिः अस्याः सेवा कर्तव्या।
सिद्धार्थाः वने कन्दमूलानि भुक्त्वा निर्वाहं कुर्वन्ति स्म। ते धरण्यां शयनं कुर्वन्ति स्म। ततः ते दिवसे केवलं एकदा एक मुष्टिमात्रम् अन्नं भुक्त्वा जीवन्ति स्म। अनेन ते अतिदुर्बलाः जाताः। एक दिवसे ते नदीं स्नानार्थं गताः
अतिदुर्बलता आगता। उत्थातुम् अपि शक्तिः नासीत्।
एक वृक्षस्य आलंबमानां शाखां धृत्वा महता कष्टेन ते उत्थिताः।


परन्तु द्वित्रिपदानि चलन्नेव ते अशक्ततया निपतित:।
कथमपि स: पुन: उत्थित:।
आग्रिमदिने ते वटवृक्षस्य अध: उपविष्टा: आसन् तदा गोचारक कन्या सुजाता आगत्य तेभ्य: भोजन दत्तवती।
धन्यवादा: त्वया मह्यं भोजनं दत्तम्।
अनन्तरम्-
भवद्भि: पुन: भोजनारंभ: कृत: किमर्थम्?
मम विश्वास: सञ्जात: यत् बुभुक्षा-परि-पालनेन सत्यप्राप्ति: न भवति।
पञ्चसाधव: महतीं निराशतां गता:।
एते अस्माकं श्रद्धार्थं न योग्या:
हं, अस्य जीवनस्य सुखलालसा अस्ति।


सिद्धार्थ: अधुना एकल एव स्थिता:।
ते मां त्यक्त्वा विनिगता:- गच्छन्तु। अयं मम विश्वास: जात: यत् बुभुक्षापीडित-शरीरेण किमपि साध्यं न भवति।
ते तत: निर्गत्य एक बोधिवृक्षाध: उपविष्टा:।
उष्णता शीतता, बुभुक्षा पिपासा, पर्जन्य: आतप: चैतत्सर्वं तेन सोढम्।
किमपि भवतु, यावत् दु:खान्तस्य उपाय: मया न प्राप्यते तावत् इत: न प्रचल्यते मया।
सांसारिक सुखानां दृश्यानि तेषां नेत्रयो: पुरत: सन्तरन्ति परन्तु एते न व्यचलन्।
तत: च तै एक: प्रकाश: दृष्ट:।
सिद्धार्थत: अयं बुद्ध: सञ्जात:- परमं ज्ञानं प्राप्तं तै।
मया प्राप्तव्यं तत्सत्यं प्राप्तम्। दु:खान्तस्य उपाय: मया प्राप्त:।


ते सप्तसप्ताहपर्यतं बोधिवृक्षाधः उपाविशन्, परमानन्दरसं प्राप्नुवन्
ततः अन्येषां मार्गदर्शनार्थं ते प्रस्थिताः। प्रथमं वाराणसीं प्राप्ताः–
तेषां पञ्चसाधूनाम् अन्वेषणार्थं ये उरुबिल्वारण्ये तेन सह अतिष्ठन्।
सिद्धार्थाः आगच्छन्ति। प्रत्यागताः संसारे। वयम् अनेन सह वार्तां न कुर्मः।
परन्तु यदा सिद्धार्थाः समीपम् आगताः तदा ते आदरभावेन उदतिष्ठन्।
मया यत्प्राप्तं तत् भवद्भ्यः कथनार्थम् आगतः अस्मि।
बुद्धानां प्रवचनं श्रुत्वा ते तेषां शिष्याः अभवन्। एवं विधं संघस्य स्थापना जाता।
संसार दुःखानां खनिः। इच्छा दुःखानां मूलकारणम्। यदा भवन्तः स्वयं इच्छामुक्ताः तदा दुःखमुक्ताः भवेयुः। अहं भवद्भ्यः दुःखमुक्त्यर्थं मार्गं दर्शयिष्यामि
ते उरुबिल्वं प्रत्यागताः। कश्यपनामकस्य च ब्राह्मणस्य गृहं प्राप्नुवन्।
भवन्तः किमिच्छन्ति?
अहमत्र एक रात्रौ निवसामि।


भवतां स्वागतम् अस्ति आगच्छन्तु।
कश्यपः अग्निपूजकः आसीत्।
अपि अहं तस्मिन् कक्षे निवासं कर्तुं शक्नोमि? यत्र भवतां पवित्रः अग्निः प्रतिष्ठितः क्रियते।
अपि भवन्तः नहि जानन्ति? यत् रात्रौ नागदेवताः अग्निं रक्षन्ति यदा भवन्तः अग्ने समीपं गच्छन्ति तदा ताः भवतः दशन्ति।
मम किमपि भयं नास्ति। रात्रौ अहं तत्रैव निवसामि।
कश्यपेन तेषाम् इच्छा संमता। बुद्धाः मौनं धृत्वा अग्निसमीमुपाविशन्। कश्यपः बहिः गत्वा सुप्तः।
प्रातः कालः सञ्जातः –
अग्निकक्षान्तर्भागं गत्वा पश्यामि – वराकः मृतः स्यादेव।



अन्तर्भागं गत्वा सः अपश्यत् यत् बुद्धाः शान्त-मुद्रया उपाविशन्। अग्नितेजसा तेषां मुखं प्रदीप्तं अभवत्।
अहं भवतः गुरुं मन्ये। मह्यं दीक्षा दीयताम्।
बुद्धैः तस्मै तथा अन्यव्यक्तिभ्यः अपि उपदेशः दत्तः।
एकदिने–
भगवन्तः मया श्रुतमस्ति यत् राजा बिंबिसारः महान्तं यज्ञं कर्तुम् इच्छति।
राजगृहं वयं गच्छामः।
राजगृहस्य मार्गे मेषवृन्दं तैः दृष्टम्। तेषु एकमेषः खञ्जः आसीत्। बुद्धैः सः स्वहस्ताभ्यां धृत्वा स्वबाह्वोः स्थापितः।
वराकः महतीं पीडां सहते।



भवान् कुत्र गच्छन्ति?
राजगृहम्। एते मेषाः महाराजस्य सन्ति यज्ञाग्नौ एतेषां बलिः दीयते।
बिंबिसारेण समाचारः प्राप्तः यत् बुद्धाः राजगृहं समागच्छन्ति। सः तेषां स्वागतार्थं संमुखमागतः।
एते तु उरुबिल्वस्य कश्यपेन सह। अपि बुद्धाः कश्यपस्य शिष्यत्वं गताः?
समीपम् आगत्य बुद्धैः मेषः बाहुभ्याम् अवतारितः।
महाराजाः मया यज्ञः आयोजितः। भवन्तः तथा कश्यपः च सहभागं गृहीत्वा कृपां कुर्युः।
भवताम् इच्छा आसीत् यदा अहं सत्यम् अन्विष्ये तदा अत्र आगत्य भवद्भ्यः दीक्षां ददातु तथागतोऽस्मि।



राजन् निस्पृहपशूनां हननं शुभकार्यं भवितुं नार्हति सुखप्राप्तिः यज्ञेन न भवति।
राजा कश्यपः पृष्टः -
कश्यपमहाराजाः भवतां कः विचारः? भवन्तः तु अग्निदेवस्य उपासकाः सन्ति।
कश्यपैः बुद्धाग्रे शिरः अवनामितम्।
अहं तु बुद्धशिष्यः अस्मि।
साधु! बुद्धाः गुरवः। भवतामपि यज्ञविषये आस्था नास्ति।
बुद्धैः अस्मभ्यं यथार्थः मार्गः प्रदर्शितः। अस्माकं दुःखात् मुक्तिं अग्नेः उपासना न वा, मूकपशुबलिः वा न करोति।
राजा बुद्धान् प्रार्थयत यत् -
भगवन्तः, अस्मभ्यम् उपदेशं कुरुत।
बुद्धैः च उपदेशः कृतः।


भगवन्तः, मया यज्ञस्य विचारः त्यक्तः। अहं बुद्धानां शरणम् आगच्छम्।
अग्रिमदिने राज्ञा बुद्धाः तेषां च शिष्याः स्वप्रासादे भोजनार्थं निमन्त्रिताः। भोजनान्ते -
भगवन्तः, मम उद्यानं वेणुवनसंघाय समर्पयामि- स्वीकारः भवतु।
एकदिने कृशा गौतमी मृतं स्वबालकं गृहीत्वा बुद्धसमीपम् आगता।
भगवन्तः, कृपां कृत्वा अयं बालकः जीवितः कर्तव्यः। मम एतदेव एकं सन्तानम् अस्ति।
धैर्यं धारय। एकं कार्यं कुरु। केचन सर्षपा आनेयाः - परन्तु यस्य गृहे कस्य अपि मृत्युः नाभवत् तस्य गृहतः आनेयाः। ततः तव बालकः मया जीवितः क्रियते।
कृशा गौतमी प्रतिगृहं गतवती।
गतवर्षे मम पत्युः स्वर्गवासः अभवत्।
मम बालकद्वयस्य मृत्युः जातः।
मम माता ह्यः एव मृत्यु गता।


कृशा गौतमी निराशतां गत्वा बुद्धसमीपं प्रत्यागता।
भगवन्तः एतादृशं कस्य अपि गृहं नास्ति यत्र मृत्युः नाभवत्।
यस्य जन्म अस्ति, तस्य एकदिने मृत्युः भवत्येव। जीवने दुःखातिरिक्तं किमपि नास्ति। इच्छाभ्यः मुक्तिरेव अस्मभ्यं मुक्तिं दास्यति।
कतिपयवर्षानन्तरं शुद्धोधनस्य राजसभायाम्–
महाराज, अस्माकं राजकुमारेण बहुयशः अधिगतम्। बहवः जनाः तस्य शिष्याः अभवन्। ते तस्य उपदेशस्य प्रचारं कुर्वन्ति।
सिद्धार्थं प्रति गच्छत, कथयत च, अहं वृद्धताम् अगच्छम्, मृत्योः पूर्वं त्वां द्रष्टुम् इच्छामि।
बुद्धाः कपिलवस्तुम् आगताः –
आगच्छतु पुत्र! मम इच्छा अस्ति, राजकर्म त्वं निर्वह
नहि - मया तु शान्तिमार्गः स्वीकृतः।
समीपस्थे एव एक-उद्याने राज्ञा बुद्धार्थं निवासव्यवस्था कारिता।


अग्रिमदिने प्रातःकाले –
महाराज, राजकुमारः प्रतिगृहं गत्वा भिक्षां याचते।
मां त्वरितं तं प्रति नयतु।
पुत्र, अपि भिक्षायाः आवश्यकता अस्ति?
अस्माकं एषः नियमः एव
अत्र कः अर्थः? राजकुलवंशजः! त्वम् असि।
राजकुलवंशजाः भवन्तः सन्ति महाराजाः। अहं तु प्राचीनबुद्धानां वंशजः अस्मि ते भिक्षां याचित्वा एव स्वनिर्वाहं कुर्वन्ति स्म।
एकदा ते राजप्रासादं गताः तत्र च महत्यां मधुरभाषायां तैः उपदेशः कृतः।
एतेषां वचनानि महात्मनां वचनानि एव।
मनः अतिशान्तिं नयन्ति।


बुद्धैः दृष्टं यत् यशोधरा अनुपस्थिता आसीत्।
यशोधरा कुत्र अस्ति?
सा न आगता
भवतां निर्गमनान्ते सा दुःखेन जीवति। तया केशवपनं कृतम्, सामान्यवस्त्राणि धार्यन्ते, अतिसामान्यं भोजनं गृह्यते– यथा भवतां पद्धतिः।
बुद्धाः द्वौ शिष्यौ गृहीत्वा यशोधरां प्रति गताः।
अहं अस्याः मनः-पीडां दूरीकर्तुं प्रयते।
यशोधरा बुद्धचरणयोः पतित्वा रोदिति।
तदा तस्याः ध्याने अन्यजनानाम् उपस्थितिः आगता सा च उत्थाय किञ्चित् दूरं गत्वा उपाविशत्।
बुद्धैः तस्याः सान्त्वनं कृतम्।


कपिलवस्तुं बुद्धागमनान्ते एकसप्ताहः व्यतीतः जातः-
"राहुल, पश्य, सर्वेषां मध्ये ये सज्जना. उपविष्टाः ते तव पितृचरणाः। तेषां समीपं गच्छ, तेषां संपत्त्याः च स्वभागं प्रार्थयस्व" इति।
राहुलः बुद्धसमीपं गतः।
पितृचरणाः, माता भवतां संपत्त्याः स्वभागं प्रार्थयितुं मां प्रेषितवती।
बुद्धाः स्वशिष्यं सारिपुत्रम् अवदन्-
मम पुत्रः स्वभागं गृहीतुमागतः - तथा इममपि संघस्य शरणे गृहाण।
यदा राहुलः संघस्य शरणं गतः तदा राजपरिवारीय- अनेकजनाः अपि संघे सम्मिलिताः जाताः। एतेषु देवदत्तः अपि आसीत्। सः बुद्धैः सह निवसति स्म। एकस्मिन दिने-
भगवन्तः भवन्तः अधुना विश्रामं गृह्णन्तु संघसंचालन-भारं मयि आरोपयन्तु।
नहि, देवदत्त, संघस्य कृते अधुनापि मम आवश्यकता अस्ति।


देवदत्त: बुद्धानाम् अतिद्वेषं करोति स्म। सः राजगृहं गत्वा बिंबिसारस्य पुत्रम् अजातशत्रुम् अमिलत्।
राजकुमार अजातशत्रो, भवान्, अद्यापि कतिकालं राजपदार्थं प्रतीक्षते? स्वपितरं बन्दिं कृत्वा सिंहासने अधितिष्ठतु।
विचारः तु साधुः, देवदत्त अहम् एवमेव करिष्ये।
अजातशत्रुणा देवदत्तस्य कथनं पूर्णं कृतम्।
राजपदग्रहणस्य आनन्दः एव कश्चित् विशेषः। तव आभारं मन्ये देवदत्त। यदिच्छसि त्वं तदर्थं तव सहायं करिष्ये।
महाराज, अहं भवतः सहायम् अपेक्षे अपि-बुद्धं हन्तुम्। तस्य विषये मम मनसि घृणा अस्ति।
देवदत्तेन बुद्धान् हन्तुं कतिपयाः उपायाः कृताः।
संरक्षन्तु, एका महती शिला बुद्धान् प्रति लुठ्यन्ती आगच्छति।
यथापूर्वम् उपविशन्तु। किमपि अहितं न भवति।


शिला द्विखण्डिता जाता - एकः खण्डः बुद्धानाम् एकपार्श्वे अन्यः चान्यपार्श्वे पतितौ।
देवदत्तस्य अनेकानुयायिनः बुद्धानां संघे सम्मिलिताः जाताः।
अयं शिलाद्वारा अपि न मृतः।
शरीरेण कृशः - तथापि किं तेन? एते महात्मानः।
मया श्रुतं यत् मम अनेके व्यक्तयः बुद्धस्य संघे सम्मिलिताः। ततः किं गजद्वारा सः घात्यते?
अजातशत्रुणा पुनः आज्ञा कृता।
नालगिरिगजं मदोन्मत्तं कृत्वा बुद्धस्य मार्गे मुञ्चतु।
धावत धावत - नालगिरिः विमुक्तः जातः। अर्ध नगरं तेन विनष्टम् - विंशतिजनाः च हताः।
भगवन्तः, कुत्रापि समाश्रितव्यम् - एकः प्रमत्तः हस्ती अत्रागच्छति।
नहि - सः अस्मान् न पीडयति।


नालगिरिः उन्मद्यन् आगच्छति स्म क्रोधेन च प्रमत्तः भूत्वा बुद्धान् अभ्यधावत्।
बुद्धाः हसन्तः स्वहस्तम् उदधरन्। हस्ती तत्क्षणे एव शान्तः जातः तेषां च चरणयोः पतितः।
अजातशत्रुः सुखी नासीत्। प्रायः सः रुग्णः भवति स्म। जीवकः तस्य वैद्यः आसीत्।
जीवक, अहं सदा रुग्णः किं भवामि?
भवतः रुग्णता शारीरिकी नास्ति, मानसिकी अस्ति! बुद्धाः एव त्वां निरोगतां नेतुं शक्नुवन्ति।
ततः वयं तान् प्रत्येव चलामः। अद्यतने ते कुत्र सन्ति।
वैशाल्याः आम्रवने सन्ति।
आम्रवनं तु नर्तक्याः आम्रपाल्याः अस्ति।
हे, महाराज, आम्रपाल्या बुद्धेभ्यः उपहारीकृतम्।
अजातशत्रुः आम्रवने आगतः-
मया कस्यापि शब्दः नहि श्रूयते। बुद्धाः कुत्र सन्ति?
ते १२०० तः अपि अधिक-शिष्यैः सह अत्रैव निवसन्ति।


अजातशत्रुः शङ्काकुलः सञ्जातः।
१२०० व्यक्तयः - परन्तु कः अपि शब्दः एव नास्ति। अपि भवान् मम हत्यां कारयितुं माम् अत्र आनयत्? अपि भवता षड्यन्त्रं रचितम्?
महाराज, ममोपरि विश्वासः कर्तव्यः चलतु।
बुद्धानां मृदुवाणीं शिष्यवृन्दम् एकाग्रचित्तेन शृणोति स्म। एतद् दृष्ट्वा अजातशत्रुः चकितः जातः।
समस्तदुःख - पीडा - भय - घृणानां कारणं इच्छाः सन्ति। या व्यक्तिः इच्छाभ्यः मुक्ता भवति तदा तस्याः कः अपि क्लेशः न तिष्ठति। तस्याः भयं कस्मात्?
कियती शान्तिः प्राप्नोति?
अजातशत्रुः बुद्धानां शिष्यः जातः।
तत्पश्चात् देवदत्तः अपि पश्चात्तप्तः अभवत्। एकदिने तेन स्वानुयायिभ्यः कथितम् -
सहकारिणः, मां बुद्धसमीपं नयन्तु। मम पीडितमनसे ते एव शान्तिं दातुं शक्नुवन्ति।




वाहकाः देवदत्तस्य शिबिकाम् अवतार्य विश्रामार्थं निर्गताः।
मम सहकारिणः कुत्र गताः? मया शीघ्रमेव बुद्धसमीपं प्राप्तव्यम्।
बुद्धसमीपं प्राप्तेः पूर्वं सः प्रस्खलन् भूमौ पतितः।
मम अन्तःकालः आगतः। मया ज्ञातं यत् बुद्धैः परमं ज्ञानं प्राप्तम् - ते सर्वेषां गुरवः। अहं तेषां शरणं गतवान्।
बुद्धं शरणं गच्छामि।
धर्मं शरणं गच्छामि।
संघं शरणं गच्छामि।
बुद्धैः दीर्घायुः प्राप्तम्। लक्षशः जनाः तेषां शरणं गताः। तेषाम् उपदेशैः तैः शान्तिः प्राप्ता। विभिन्न-भाषाभाषिजनाः सुदूर-देशस्थाः च जनाः तेषाम् अनुयायिनः अभवन्।

भागवत पुराण पर आधारित श्रीकृष्ण की कथाएं

अब अमर चित्र कथा प्रस्तुत करती है भारतीय पुराणों के सबसे लोकप्रिय चरित्र भगवान कृष्ण की कथाएं.... पूरे नौ भागों में।





अब तक प्रकाशित खंड

1. गोकुल का लाड़ला कृष्ण
2. कालिय मर्दन
3. गोवर्धनधारी कृष्ण
4. कंस का वध
5. द्वारकाधीश कृष्ण
6. मनमोहन कृष्ण
7. अजेय कृष्ण
8. पांडव-सखा कृष्ण
9. पालनहार कृष्ण

मूल्य: **6** रुपये (प्रत्येक खंड)

अमर चित्र कथा त्रिवेणी अंकों में भी उपलब्ध. प्रत्येक त्रिवेणी अंक में तीन खंड.
*(मूल्य: **20** रु. प्रत्येक)*

65. बाल कृष्ण
66. किशोर कृष्ण
67. उद्धारक कृष्ण

भारतीय संस्कृति से परिचित कराये...

अमर चित्र कथा

प्रकाशक :
IBH
इंडिया बुक हाउस प्रा. लि.
महालक्ष्मी चेम्बर्स, 22, भूलाभाई देसाई रोड, बबई 400 026.